प्रथमा दीक्षा : सम्भाषणम्

## देहलीं गमिष्यामः

भविष्यत्

गिरिजा - विरामसमये कुत्रापि प्रवासं करिष्यामः ।

पतिः - आगामिसप्ताहे मम कार्यालसतः पञ्चजनाः नवदेहलीं गमिष्यन्ति इति श्रूयते । वयमपि तैः सह गमिष्यामः ।

गिरिजा - देहल्यां कुत्र वासं करिष्यामः ?

पतिः - ते सर्वेऽपि धर्मशालायां वासं करिष्यन्ति । भोजनम् उपहारमन्दिरे करिष्यामः ।

अजितः - तात । श्वः आरभ्य मासं यावत् विरामः अस्ति । वयमपि प्वासार्थं गमिष्यामः ।

पतिः - आगामिसप्ताहं प्रवासः भविष्यति । चिन्ता मास्तु ।

माता - पुत्रौ उष्णजलम् पास्यतः । तत् कथं नेष्यामः ।

पिता - समीचीनं जलं मार्गे अपि भविष्याति , तत् वयं क्रेष्यामः ।

माता - खाद्यानि वयं प्रथमम् एव क्रेष्यामः । देहल्याम् अतिशैत्यम् । अतः अधिकानि वस्त्राणि स्वीकरोतु:

पुत्री - तत्र गन्तुं कः चिटिकाः क्रेष्यति ?

पिता - अहं चिटिकाः आनेष्यामि ।

पुत्री - अग्रज । त्वं कुत्र उपवेक्ष्यासि ?

आजित - अहं वातायनमार्श्वे उपवेक्ष्यामि ।

माता - युवां मम पार्श्वे उपवेक्ष्यथः । गमनसमये निद्रां करिष्यथः ।

पुत्री - एवं समीचीनम् । तथैव उपवेक्ष्यावः ।